# 12 - द्वादश दशकम्
# वराह अवतारम्

यम्भुवो मनु रथो जन सर्ग शीलो
दृष्ट्वा महीम समये सलिले निमग्नाम् ।
स्रष्टार माप शरणं भवदङ्घ्रि सेवा
तुष्टाशयं मुनिजनैस् सह सत्यलोके ॥ ॥12-1॥

कष्टं प्रजास् सृजति मय् यवनिर् निमग्ना
स्थानं सरोजभव कल्पय तत् प्रजानाम् ।
इत्येव मेष कथितो मनुना स्वयंभूः
अम्भोरुहाक्ष तव पाद युगं व्यचिन्तीत् ॥ ॥12-2॥

हा हा विभो जलमहं न्यपिबं पुरस्तात्
अद्यापि मज्जति मही किमहं करोमि ।
इत्थं त्वदङ्घ्रि युगलं शरणं यतोऽस्य
नासापुटात् समभवश् शिशु कोल रूपी ॥ ॥12-3॥

अङ्गुष्ठ मात्र वपु रुत्पतितः पुरस्तात्
भोयोऽथ कुम्भि सदृशस् समजृम्भथास् त्वम् ।
अभ्रे तथाविध मुदीक्ष्य भवन्त मुच्चैः
विस्मेरतां विधिरगात् सह सूनुभिस् स्वैः ॥ ॥12-4॥

कोऽसा वचिन्त्य महिमा किटि रुत्थितो मे
नासापुटात् किमु भवे दजितस्य माया ।
इत्थं विचिन्तयति धातरि शैलमात्रः
सद्यो भवन् किल जगर्जिथ घोर घोरम् ॥ ॥12-5॥

तं ते निनाद मुपकर्ण्य जनस् तपस्थाः
सत्य स्थिताश्च मुनयो नुनुवुर् भवन्तम् ।
तत् स्तोत्र हर्षुलमनाः परिणद्य भूयः
तोयाशयं विपुल मूर्ति रवातरस् त्वम् ॥ ॥12-6॥

ऊर्ध्व प्रसारि परिधूम्र विधूत रोमा
प्रोत्क्षिप्त वालधि रवाङ्मुख घोर घोणः ।
तूर्ण प्रदीर्ण जलदः परिघूर्ण दक्ष्णा
स्तोतृन् मुनीन् शिशिरयन् नवतेरिथ त्वम् ॥ ॥12-7॥

अन्तर्जलं तदनु संकुल नक्र चक्रं
भ्राम्यत् तिमिङ्गिल कुलं कलुषोर्मि मालम् ।
आविश्य भीषण रवेण रसातल स्थान्
आकम्पयन् वसुमती मगवेषयस् त्वम् ॥ ॥12-8॥

दृष्ट्वाऽथ दैत्य हतकेन रसातलान्ते
संवेशितां झटिति कूट किटिर् विभो त्वम् ।
आपातुका नविगणय्य सुरारि खेटान्
दंष्ट्राङ्कुरेण वसुधा मदधास् सलीलम् ॥ ॥12-9॥

अभ्युद्धरन् नथधरां दशनाग्र लग्न
मुस्ताङ्कु राङ्कित इवाधिक पीवरात्मा ।
उद्धूत घोर सलिलाज् जलधे रुदञ्चन्
क्रीडा वराह वपुरीश्वर पाहि रोगात् ॥ ॥12-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥